# श्लोकपरिचयः

अनाघ्रातं पुष्पं किसलयमलूनं कररुहैः
(पदच्छेद-अन्वय-अन्वयार्थादिसहितः)
रणितनायेकः

अनाघ्रातं पुष्पं किसलयम् अलूनं कररुहै-
रनाविद्धं रत्नं मधु नवम् अनास्वादितरसम्।
अखण्डं पुष्पाणां फलम् इव च तद्रूपम् अनघं
न जाने भोक्तारं कम् इह समुपस्थास्यति विधिः॥

**भूमिका** संस्कृतसाहित्यवीथिकायां कविचक्रचूडामणिना महाकविकालिदासेन विरचितस्य अभिज्ञानशाकुन्तलमिति नाटकस्य द्वितीयाङ्के समुपलभ्यतेऽयं श्लोकः।

**पदच्छेदः** अनाघ्रातं पुष्पं किसलयम् अलूनं कररुहैः अनाविद्धं रत्नं मधु नवम् अनास्वादितरसम् अखण्डं पुण्यानां फलम् इव च तद् रूपम् अनघं न जाने भोक्तारं कम् इह समुपस्थास्यति विधिः।

**अन्वयः** अनाघ्रातं पुष्पम् इव कररुहैः अलूनं किसलयम् इव अनाविद्धं रत्नम् इव अनास्वादितरसं नवं मधु इव अखण्डं पुण्यानां फलम् इव च अनघं तद्रूपं विधिः इह कं भोक्तारं समुपस्थास्यति इति न जाने।

**पदपरिचयः**

| | | |
|---|---|---|
| अनाघ्रातम् | – | न आघ्रातं नासिकाविषयीकृतम् इति अनाघ्रातम्। नञ्तत्पुरुषसमासः। विशेषणम्। प्रथमायाः एकवचनम्। |
| पुष्पम् | – | पुष्प इति अकारान्तक्लीबलिङ्गशब्दस्य प्रथमायाम् एकवचनस्य रूपम् इदम्। |
| इव | – | अव्ययम्। |
| कररुहैः | – | करे रोहति इति विग्रहे कर इति उपपदपूर्वकाद् रुह्-धातोः क-प्रत्ययः (इगुपधज्ञाप्रीकिरः कः इति सूत्रेण कप्रत्ययः)। करणे तृतीयायां बहुवचने रूपम्। |
| अलूनम् | – | लञ् छेदने इति धातोः क्तप्रत्यये लूनम्। न लूनम् अलूनम् इति नञ्तत्पुरुषसमासः। प्रथमायाः एकवचनस्य रूपम् इदम्। |
| किसलयम् | – | किसलय इति अकारान्तक्लीबलिङ्गशब्दस्य प्रथमायाः एकवचनस्य रूपम् इदम्। |
| इव | – | सादृश्येऽर्थे अव्ययम्। |
| अनाविद्धम् | – | आ इति उपसर्गपूर्वकात् व्यध ताडने इति धातोः कर्मणि क्तप्रत्यये आविद्धम्। न आविद्धम् इति अनाविद्धम् इति नञ्तत्पुरुषसमासः। विशेषणमिदम्। प्रथमायाः एकवचनस्य रूपम् इदम्। |
| रत्नम् | – | रत्न इति अकारान्तक्लीबलिङ्गशब्दस्य प्रथमायाः एकवचनस्य रूपम् इदम्। |
| इव | – | सादृश्येऽर्थे अव्ययम्। |

अनास्वादितरसम् – आ इति उपसर्गपूर्वकात् स्वद आस्वादने इति चुरादिगणियात् धातोः कर्मणि क्तप्रत्यये आस्वादितम् इति। आस्वादितो रसो यस्य तद् आस्वादितरसम् इति बहुव्रीहिसमासः, न आस्वादितरसम् इति अनास्वादितरसम् इति नञ्तत्पुरुषसमासः। विशेषणम्। प्रथमायाः एकवचनस्य रूपम् इदम्।

नवम् – नव इति अकारान्तक्लीबलिङ्गशब्दस्य प्रथमायाः एकवचनस्य रूपम् इदम्। विशेषणम्।

मधु – मधु इति उकारान्तक्लीबलिङ्गशब्दस्य प्रथमायाः एकवचनस्य रूपम् इदम्।

इव – सादृश्येऽर्थे अव्ययम्।

अखण्डम् – न खण्डो विभागो यस्य तद् अखण्डम् इति बहुव्रीहिसमासः। विशेषणम्। प्रथमायाः एकवचनस्य रूपम् इदम्।

पुण्यानाम् – पुण्य इति अकारान्तक्लीबलिङ्गशब्दस्य षष्ठ्याः बहुवचनस्य रूपम् इदम्।

फलम् – फल इति अकारान्तक्लीबलिङ्गशब्दस्य प्रथमायाः एकवचनस्य रूपम् इदम्।

इव – सादृश्येऽर्थे अव्ययम्।

च – अव्ययम्।

अनघम् – अविद्यमानम् अघम् अस्य इति विग्रहे नञोस्त्यर्थानां च इति वार्तिकेन बहुव्रीहिसमासः। यस्मिन् तद् अनघम् इति बहुव्रीहिसमासः। विशेषणम्। प्रथमायाः एकवचनस्य रूपम् इदम्।

तत् – तद् इति सर्वनामशब्दस्य क्लीबलिङ्गैकवचनस्य रूपम् इदम्।

रूपम् – रूप इति अकारान्तक्लीबलिङ्गशब्दस्य प्रथमायाः एकवचनस्य रूपम् इदम्।

विधिः – विधि इति इकारान्तपुंलिङ्गशब्दस्य प्रथमायाः एकवचनस्य रूपम् इदम्।

इह – अव्ययम्।

कम् – किम् इति सर्वनामशब्दस्य पुंलिङ्गे द्वितीयायाः एकवचनस्य रूपम् इदम्।

भोक्तारम् – भोक्तृ इति ऋकारान्तपुंलिङ्गशब्दस्य द्वितीयायाः एकवचनस्य रूपम् एतत्।

समुपस्थास्यति – सम् इति उपसर्गपूर्वकात् तथा उप इति उपसर्गपूर्वकात् ष्ठा गतिनिवृत्तौ इति धातोः लृटि प्रथमपुरुषैकवचनस्य रूपम् एतत्।

इति – समाप्त्यर्थकम् अव्ययम्।

न – निषेधार्थकम् अव्ययम्।

जाने – ज्ञा अवबोधने इति धातोः उत्तमपुरुषैकवचनस्य रूपम् इदम्।

**अन्वयार्थः** न नासिकाविषयीकृतं कुसुमम् इव; नखैः अच्छिन्नं पल्लवम् इव; असूचिभिन्नः मणिः इव; अगृहीतास्वादम् अनुच्छिष्टं च नवं मधु इव; तद् अखण्डं परिपूर्णम्; अनेकजन्मार्जितानां सुकृतानां परिणाम इव सुदुर्लभं निष्पापं शकुन्तलालावण्यम्। ब्रह्मा अत्र जगति कं भाग्यवन्तं पुरुषं उपभोगकर्तारम् उपस्थितं करिष्यति इति नाहं वेद्मि।

**प्रसङ्गनिर्देशः** राजा दुष्यन्तः कण्वदुहितरं शकुन्तलां यदा सखीभ्यां साकं दृष्टवान् तदैव तस्याम् आसक्तो जातः। किन्तु, तद्विरहाद् राजा आश्रमपार्श्वस्थवने एव स्वमित्रैः सह अतिष्ठत्। कदाचिद् राजा स्वमित्रं विदूषकं प्रति शकुन्तलायाः रूपम् अनेन श्लोकेन वर्णयति।

**सरलार्थः** विदूषकस्य "यद्येवम्, प्रत्यादेश इदानीं रूपवतीनाम्" इति कथनं समर्थयन् राजा शकुन्तलायाः लौकिकसौन्दर्यविषये इत्थं वदति यत् शकुन्तलाया निर्दोषं रूपं तथैव विद्यते यथानाघ्रातं कुसुमम्, नखैरच्छिन्नं नवपल्लवम्, अक्षतं रत्नम्, अगृहीतास्वादं नूतनं मधु इव। सुकृतानां सम्पूर्णं फलम् इव च तद् (रूपम्) ब्रह्मा संसारे कम् उपभोगकर्त्तारम् उपनेष्यतीति न जाने। विशालेऽस्मिन् लोके कः सौभाग्यशाली जनः एतादृशस्याप्रतिमरूपस्योपभोक्ता भविष्यति इति तु अज्ञातम् एव।

**व्याख्या** महाकविकालिदासः अनेन श्लोकेन शकुन्तलायाः रूपलावण्यं प्रकटयति। राजा दुष्यन्तः वैखानसेन प्रेरितः सन् कण्वाश्रमं प्रविवेश। किञ्च, तत्र शकुन्तलां दृष्ट्वा तस्याः रूपलावण्येन मुग्धोऽभूत्। ततः राजा शकुन्तलायाम् आसक्तः सन् आश्रमपार्श्वस्थवने एव अनुचरैः सह उवास। तासु प्रजासु एतद्वृत्तान्तं ज्ञातवते राज्ञः प्रियमित्राय विदूषकाय अरण्यनिवासमिदं न रोचते स्म। अतः स वैरस्यतया राजानं कथयञ्चकार, "भोः राजन्! यथा पिण्डीखर्ज्जुरैरुद्वेजितस्य तिन्तिड्यां श्रद्धा भवति, तथा अन्तःपुरस्त्रीरत्नपरिभोगिनो भवत इयं प्रार्थना" इति। एतच्छ्रुत्वा राजा मनःस्थितां शकुन्तलायाः अनिन्द्यस्य अकलङ्कस्य च रूपस्य पवित्रताम् अन्यास्पृष्टतां सौभाग्यशालिलभ्यतां च विदूषकस्य पुरस्तात् प्रकाशयति यत् तस्याः वपुः अकृताघ्राणं पुष्पमिव विद्यते। अर्थात् केनापि तस्याः वपुः न घ्रातमित्यर्थः। किञ्च नखैः अच्छिन्नं पल्लवम् इव कोमलमस्ति। तथा वेधरहितं रत्नमिव सा तथा अनास्वादितं सद्यः जातं मधु इव सा, तस्या इदं पुण्यानाम् अनेकजन्मार्जितानां सुकृतानां फलं विद्यते। ब्रह्मा इह जगति कं भाग्यवन्तम् उपस्थास्यति इति न ज्ञायते राज्ञा।

**अलङ्कारः** अस्मिन् श्लोके एकस्याः शकुन्तलायाः बहुभिः उपमितत्वाद् मालोपमालङ्कारः। अनाघ्रातम्, अलूनम्, अनाविद्धम् इत्यादिभिः विशेषणैः विशेषाभिप्रायः प्रकटितः भवति। शकुन्तला अन्येन केनचिद् अस्पृष्टा अस्ति इति अभिप्रायः विशेषणैः प्रकटितः इति कारणेन परिकरालङ्कारः अपि अत्र अस्ति। उभयोः परस्परं पृथक्करणासमर्थतया सङ्करः। परिकरालङ्कारप्रयोजकैः विशेषणैः शकुन्तलायाः देहसौष्ठवं निर्दुष्टम् अभिनवं च अस्ति इति वस्तु अपि व्यज्यते इति वस्तुध्वनिः। दुष्यन्तः अत्र शकुन्तलायाः गुणान् कीर्तयति। तस्माद् गुणकीर्तनं नाम नाट्यलक्षणम्। राजा कामस्य चतुर्थीं दशां प्राप्तवान् अस्ति इति स्पष्टं प्रतीयते।

**छन्दः** अस्मिन् श्लोके शिखरिणीच्छन्दो विद्यते। तस्य छन्दसः लक्षणं तावत्– "रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी" इति।